International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(5): 65-66
© 2025 IJMH
www.themultijournal.com

Received: 30-09-2025
Accepted: 08-10-2025
Publish : 09-10-2025

**वैभवीरायः**
शोधच्छात्रा,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**वैभवीरायः**
शोधच्छात्रा,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# किरातार्जुनीयमहाकाव्ये भगवतः शिवस्य विभिन्न नामानां वैशिष्ट्यम्

**वैभवीरायः**

'भगवान् शिवः सनातनधर्मस्य मुख्यदेवतासु अन्यतमः अस्ति, यः 'महादेवः' 'महाकालः' इत्यपि प्रसिद्धः अस्ति।सः त्रिदेवः – ब्रह्मा, विष्णुः, महेश्वररूपेण जगत् विनाशकस्य विनोदकस्य च भूमिकां निर्वहति।

महाकविः भारविना विरचितं किरातार्जुनीयं संस्कृतसाहित्यस्य एकम् अद्वितीयं महाकाव्यं वर्तते,यत् महाभारतस्य वनपर्वात् प्रेरितमस्ति। महाकाव्येऽस्मिन् अर्जुनस्य तपस्या, भगवतः शिवस्य किरातरूपेण आगमनं, युद्धवर्णनं तथा पाशुपतास्त्रप्रदानस्य कथा अद्वितीयकाव्यशैल्या प्रस्तुता अस्ति।अत्र भगवतः शिवस्य अनेकानि नामानि, विशेषणानि च प्राप्यन्ते, येन न केवलं तस्य रूपं शक्ति च प्रकाश्यते अपितु भारतीयसंस्कृतौ भगवतः शिवस्य महिमा अपि व्यज्यते।

किरातार्जुनीयमहाकाव्ये महाकविः भारविः भगवतः शिवस्य विभिन्न नामानां बहुवारं प्रयोगं कृतवन्तः।अधुना वयं तानि नामानि अधः पश्यामः,यथा –

## १. ईशः

'ईशः ऐश्वर्य' धातुतः 'क' प्रत्ययः कृत्वा निष्पन्नोयम् 'ईशः' शब्दः ईश्वरः अथवा महादेवार्थस्य बोधकः अस्ति।अस्य व्युत्पत्तिः – ईष्टे इति ईशः।भारविः किरातार्जुनीयमहाकाव्ये पञ्चश्लोकैः ईशः शब्दस्य प्रयोगं कृतवन्तः।यथा –

**मुञ्चतीशे शराञ्जिष्णौ पिनाकस्वनपूरितः।**
**दध्वान ध्वनयन्नाशाः स्फुटन्निव धराधरः।।** (कि.अ-१५.३४)
**विपदिते तावदवसादकरी न च कामसम्पदभिकामयते।**
**न नमन्ति चैकपुरूषं पुरूषास्तव यावदीश न नतिः क्रियते।** (कि.अ-१८.२३)
**असंविदानस्य ममेश संविदां तितिक्षितुं दुश्चरितं त्वमर्हसि।**
**विरोध्य मोहात्पुनरभ्युपेयुषां गतिर्भवानेव दुरात्मनामपि।।** (कि.अ-१८.४२)
**आस्तिक्यशुद्धमवतः प्रियधर्म ! धर्मं धर्मात्मजस्य विहितागसि शत्रुवर्गे।**
**संप्राप्नुयां विजयमीश यया समृद्धया तां भूतनाथ विभुतां वितराहवेषु।।** (कि.अ-१८.४३)
**इति निगतवन्तं सूनुमुच्चैर्मघोनः प्रणतशीरसमीशः सादरं सान्त्वयित्वा।**
**ज्वलदनलपरीतं रौद्रमस्त्रं दधानं धनुरूपपदमस्मै वेदमभ्यादिदेश।।** (कि.अ-१८.४४)

## २. पिनाकी

भगवतः शङ्करस्य धनुषः नाम पिनाकः।पा रक्षणे अथवा पन स्तुतौ धातुतः पिनाकः इति शब्दः निष्पन्नः।कोशकाराः अस्योत्पत्तिः – पातिरक्षतिः पनाय्यते स्तूयते वा इति पिनाकः मन्यन्ते।अस्य प्रयोगः महाकविः भारविः किरातार्जुनीयमहाकाव्यस्य एकादशसर्गे एवं कृतवान्,यथा –

**प्रीते पिनाकिनि मया सह लोकपालैर्लोकत्रयेऽपि विहिताप्रतिवार्यवीर्यः।**
**लक्ष्मीं समुत्सुकयितासि भृशं परेषामुच्चाय वाचमिति तेन तिरोबभूवे।।**
(कि.अ-११.८१)

अत्र इन्द्रः अर्जुनम् आशीर्वादं दत्वा वदति यदि भगवान् शङ्करः भवतः उपरि प्रसन्नः भवति तर्हि अहं तस्यानन्तरम् एवं शक्तिं प्रयच्छामि यस्य प्रतिकारः कोऽपि शत्रुः कर्तुं न शक्नोति।

**३. शम्भुः**

किरातार्जुनीयमहाकाव्ये भगवतः शिवस्य कृते 'शम्भुः' इत्यस्य प्रयोगः पञ्चवारम् अभवत्।शम्भुः इत्यस्य व्युत्पत्यर्थं भवति – शं मङ्गलं इति, शम्भुः शब्दात् मितद्रादिभ्य उपसंख्यानम् इत्यस्मिन् वार्तिकात् प्रत्ययं कृत्वा शम्भुः शब्दः अभवत्।वयं सर्वे जानिमः शम्भुः शब्दस्यार्थः भवति शिवः परन्तु ब्रह्मः, वृद्धः, विष्णुः, श्वेतार्कः आदि अनेकानि पर्यायपदानि अपि कोशाकाराः स्विकुर्वन्ति।

येषु सन्दर्भेषु भारविः शम्भुशब्दं चिनोति तत्र शम्भुशब्दस्य व्युत्पत्यर्थः अभिव्यक्तः।नवमसर्गे वर्णितमस्ति यत् श्वेतचर्मचन्द्रः कृष्णमेघ इव अन्तरिक्षं व्याप्तं तमः अपसारितवान्।कवेः दृष्ट्या तत्कालीनदृश्यम् एवं दृश्यमानासीत् यथा शम्भोः गजचर्मः ताण्डवनृत्यनन्तरं क्षिप्तं प्रियरूपेण प्रकाशमानमिव दृश्यते।

महाकाव्येऽस्मिन् युद्धस्य प्रसङ्गे शम्भोः पदस्य चयनमासीत्,यथा–

**एवं प्रतिद्वन्द्विषु तस्य कीर्तिं मौलिन्दुलेखाविशदां विधास्यन्।**
**इयेष पर्यायजयावसादां रणक्रियां शंभुरनुक्रमेण।।**

(कि.अ-१७.१८)

**विभेदमन्तः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः।**
**नेताऽरिलोकेषु करोति यद्यत्तत ञ्चकारास्य शरेषु शंभुः।।**

(कि.अ-१७.२७)

**तं शंभुराक्षिप्तमहेषुजालं लोहैः शरैर्भमसु निस्तुतोद।**
**हृतोतरं तत्त्वविचारमध्ये वक्तवे दोषैर्गुरूभिर्विपक्ष्म्।।**

(कि.अ-१७.४३)

**साम्यं गतेनाशनिना मघोनः शशाङ्ककखण्डाकृतिपाण्डुरेण।**
**शंभुं विभित्सुर्धनुषा जधान स्तम्बं विषाणेन महानिवेभः।।**

(कि.अ-१७.५१)

**४. शङ्करः**

शं कल्याणं करोतीति शङ्करः।शम् उपपदात् कृ धातोः शमि द्यातोः संज्ञायाम् इति सूत्रात् अच् प्रत्ययं कृत्वा शङ्करः शब्दस्य उत्पत्तिः भवति।स्कन्दपुराणे अस्य व्युत्पत्तिः एवमासीत् –

**सदाध्यानाय्य भक्तानां पवनं यन्निरामयम्।**
**भूतनाथत्व मप्यस्मात्तेनाह शङ्करः स्मृतः।।**

(स्क.पु.मा.ख – १५.५६)

महाकाव्येऽस्मिन् पञ्चदशसर्गे भारविः शङ्करः शब्दस्य शिवः सर्वकल्याणकारश्च इत्यर्थं गृहीतवान्।

**दूनास्तेऽरिबलादूना निरेभा बहु मेनिरे।**
**भीताः शितशराभीताः शङ्करं तत्र शङ्करम्।।**

(कि.अ-१५.३१)

**५. भूतपतिः**

किरातार्जुनीयमहाकाव्ये भगवतः शिवस्य कृते स्थलद्वये 'भूतपतिः' शब्दस्य प्रयोगमासीत्।भूतपतिः इत्यस्य अर्थः – भूतानां पतिः। महाकाव्येऽस्मिन् षोडशसर्गे अर्जुनस्य साकं युद्धसमये शिवस्य कृते भूतपतिः नाम प्रयुक्तमस्ति।

**वीतप्रभावतनुरप्यतनुप्रभावः प्रत्याचकाङ्क्ष जयिनीं भुजवीर्यलक्ष्मीम्।**
**अस्त्रेषु भूतपतिनापहृतेषु जिष्णुवर्षिष्यता दिनकृतेव जलेषु लोकः।।**

(१६.६४)

तथैव सप्तदशसर्गे भूतपतिशङ्करस्य सेनासमूहानां चर्चा वर्तते –

**मुनेर्विचित्रैरिषुभिः स भूयान्निन्ये वशं भूतपतेर्बलौघः।**
**सहात्मलाभेन समुत्पतद्भिर्जातिस्वभावैरिव जीवलोकः।।**

(कि.अ-१७.१९)

**६. भवोद्भवः**

किरातार्जुनीयमहाकाव्यस्य स्थलद्वये भगवतः शिवस्य कृते भवोद्भवः नाम प्रयोगमभवत्।भवः संसारः तस्य उद्भवः कारणं इति भवोद्भवः शिवः।अर्जुनम् इन्द्रदेवः समग्रः ऐश्वर्यप्राप्यर्थं भवोद्भवः शिवस्य आराधनार्थम् उपदेशितवान्,यः भवे उद्भवस्य कारणं सैव भवैश्वर्याणां दाता भवितुमर्हति।

**इत्युक्तवन्तं परिरभ्य दोर्भ्यां तनूजमाविष्कृतदिव्यमूर्तिः।**
**अघोपघातं मघवा विभूत्यै भवोद्भवाराधनमादिदेश।।**

(कि.अ-११.८०)

सप्तदशसर्गे भवोद्भवः शङ्करः अर्जुनस्य चापयष्टितः निर्गतान् बाणान् स्वात्मनि एवं विलीनं कृतवान् यथा माता गङ्गायाः जन्मदाता राजर्षि जह्नुः एकसमये गङ्गां स्वयमेव विलीयते स्म।

**रयेण सा संनिदधे पतन्ती भावोद्भवेनात्मनि चापयष्टिः।**
**समुद्धता सिन्धुरनेकमार्गा परे स्थितेनौजसि जह्नुनेव।।**

(कि.अ-१७.५२)

**७. स्मरारिः**

स्मरति प्रियं अनेन इति स्मरः, स्मृ धातुतः भावे अप् प्रत्ययः करणेन स्मरः इत्यस्य आविर्भावः ,अस्यार्थः भवति कामदेवः।स्मरस्य अर्थात् कामदेवस्य अरिः – स्मरारिः शिवः।किरातार्जुनीयमहाकाव्ये द्विवारं शिवस्य कृते स्मरारिः इत्यस्य प्रयोगमभवत्।

आदौ सप्तदशसर्गे स्मरारिः शङ्करस्य बाणाः अर्जुनस्य बाणान् नाशयतीति वर्णनमस्ति, यथा –

**बाणच्छिदस्ते विशिखाः स्मरारेरवाङ्मुखीभूतफलाः पतन्तः।**
**अखण्डितं पाण्डवसायकेभ्यः कृतस्य सद्यः प्रतिकारमापुः।।**

(कि.अ-१७.३०)

**अभिलषत उपायं विक्रमं कीर्त्तिलक्ष्म्योरसुगममरिसैन्यैरङ्कमभ्यागतस्य ।**
**जनक इव शिशुत्वे सुप्रियस्यैकसूनोरविनयमपि सेहे पाण्डवस्य स्मरारिः।।**

(कि.अ-१७.६४)

**८. त्रिलोचनः**

त्रीणि लोचनानि यस्य सः त्रिलोचनः शङ्करः।महाकाव्येऽस्मिन् त्रिलोचनः शब्दः शङ्करस्य कृते प्रयोगमासीत्।चन्द्रः, सूर्यः अग्निश्च भगवतः शङ्करस्य त्रीणि लोचनानि भवन्ति।

**शरवृष्टिं विधूयोर्वीमुदस्तां सव्यसाचिना।**
**रूरोध मार्गणैमार्गं तपनस्य त्रिलोचनः।।** (कि.अ-१५.४१)

यः सूर्यस्य मार्गं निरूद्धं कर्तुमर्हति सैव तस्य स्वामी भवति,भगवतः शङ्करस्य त्रिनेत्रेषु एकनेत्रे भगवान् सूर्यः तिष्ठति।अतः सूर्यस्य मार्गावरोधे शङ्करः समर्थोऽस्ति।

एवंरूपेण किरातार्जुनीयमहाकाव्यस्य अष्टादशसर्गेषु महाकविः भारविः भगवतः शिवस्य कृते विभिन्न नामानां प्रयोगं कृत्वा काव्यसौन्दर्यं वर्धितवन्तः।

**उपयुक्तग्रन्थसूची –**

१. किरातार्जुनीयम् – चौखम्बा सुरभारती प्रकाशन,वारणासी,२०२०

२. स्कन्दमहापुराणम् – नाग प्रकाशन,देहली,१९८६

३. संस्कृतसाहित्येतिहासः – किताव महल,कटक,२००८